No. १०१२ - घ

Title घटकर्परटीकाअर्थदीपिका

Author कालिदासः

Extent ५ Age

Subject काव्यम् . सम्पूर्णम्

(काव्यम्) घटखर्परिका ~~[illegible]~~ अर्थदीपिकाख्यटीका
संहिता

नं० १०२२-घ

~~पत्राणि ४ (चत्वारि)~~ ५ पत्रे

पत्राणि ५ (पञ्च) (सम्पूर्णम्)

कर्त्ता कालिदासः

सं० १०१२-घ
घटकर्परटीका अर्थदीपिका
८ पत्राणि
कागज़ — [illegible]
[illegible] [illegible]

घ·ख· टी· १

ॐ श्रीमते रामानुजाय नमः ॥ ॐ देव्यै नमः ॥ हे सखि नीरदैर्मेघैरागत्य खमाकाशं निचि-
तं व्याप्तमित्यर्थः किंविशिष्टैर्नीरदैः प्रियहीनाहृदयावनीरदैः प्रियेण हीनाः प्रिय-
हीनाः प्रोषितभर्तृकाः इति यावत् तासां हृदयभूमिस्तां रदंति विदारयंतीति यावत्
प्रियहीनाहृदयावनीरदास्तादृशैः न केवलं खं नचितं अपि तु क्षितौ पृथिव्यां सलि-
लैः पानीयैः रजो रेणुरपि निहितः न केवलं रेणुर्निहितो रविचंद्रावपि नोपलक्षि-
तौ हे सखि एवं तदपि रत्नवल्लभो नायात इति अंभोर्णस्तोयपानीयनीरक्षीरांबु

निचितं खमुपेत्य नीरदैः प्रियहीनाहृदयावनीरदैः सलिलैर्निहितं रजः क्षि-
तौ रविचंद्रावपि नोपलक्षितौ १ हंसा नदन्मेघभयाद्द्रवंति निशामुखान्य-
द्य न चंद्रवंति नवांबुमत्ताः शिखिनो नदंति मेघागमे कुंदसमानदंति २ ॥

शंबरमित्यमरः नभोंतरिक्षं गगनमनंतं सुरवर्त्म खमित्यमरः क्ष्मावनिर्मेदिनी म-
हीत्यमरः रेणुर्द्वयोः स्त्रियां धूलिः पांशुर्ना न द्वयो रजः इत्यमरः १ हे कुंदसमानदं-
ति कुंदैः समाना दंता यस्याः सा तत्संबोधने कुंदसमानदंति द्रवंति गच्छंति के हंसाः
द्रवंति निशामुखान्यद्य न चंद्रवंति न चंद्रयुक्तानीत्यर्थः न केवलं निशामुखानि
कस्मान्नदन्मेघभयात् नदंतः शब्दायमाना मेघास्तेभ्यो भयं तस्मात् शब्दायमानजलधरत्रा- राम
सादित्यर्थः न केवलं हंसा द्रवंति निशामुखान्यद्य न चंद्रवंति न चंद्रयुक्तानीत्यर्थः
न केवलं निशामुखानि चंद्ररहितानि अपि तु शिखिनोऽपि नदंतीति कथंभूताः शिखिनः
नवांबुमत्ता अभिनवजलपानमत्ता इत्यर्थः क्व सति मेघागमे वर्षासमये हे सखि पुन

अस्मिन्काले निशायां नभो न शोभते कथंभूतं नभः मेघावृतं मेघैश्छन्नं पुनः कथं
वितानं विगतास्तारा यत्र अभ्युपैति अगच्छति का निद्रा के हरिं कथं हरिं सुखसे।
वितारं सुखं सेवितुं शीलमस्यास्तु सुखसेवितारं न केवलं निद्राभ्युपैति अपितु ज
लदो मेघो रवं नादं कुर्वन् इभानां हस्तिनां संरंभमास्फोटं वहति कथं इभानां।
भूधरसन्निभानां पर्वततुल्यानामित्यर्थः हे सखि पतदपि वृत्तं परं वल्लभो नायातः
३ हे सखि दरीषु कंदरासु जलं प्रपतति कथंभूतं जलं पविधीररवं यथा स्यात्तथा
कथंभूतं जलं सतडिज्जलदार्पितं सह तडिद्भिर्वर्तते इति सतडितः तेभ्यो ने जलादा

मेघावृतं निशि न भाति नभो वितानं निद्राभ्युपैति च हरिं सुखसेवितारं सें
द्रायुधश्च जलदो धरसन्निभानां संरंभमावहति भूधरसन्निभानां ३ सत
डिज्जलदार्पितं नगेषु स्वनदंभोधरभीतपन्नगेषु पविधीररवं जलं दरीषु प्रप
तत्यभुतरूपस्तु दरीषु ४ ॥

ञ्जीतितैरार्पितं वर्षितमित्यर्थः कासु प्रपतति दरीषु कंदरासु दरी तु कंदरो वा स्त्री।
देवखातविले गुहा इत्यमरः कथं दरीषु अद्भुतरूपयुक्तास्ते द्यौ यत्र केषु नगेषु क
थं नगेषु स्वनदंभोधरभीतपन्नगेषु स्वनंतश्च ते अंभोधरश्च ते तेभ्यो भीताः पन्नगाः।
सर्पा येषु उरगः पन्नगः भोगी जिह्मगः पवनाशनः इत्यमरः हे सखि पतदपि वृत्तं।
परं वल्लभो नायातः ४ हे सखि विद्विष्प्रशीघ्रपति काले कां तामुखानि कोपि विर
लो जनः प्रसादयति प्रसन्नं करोति कथंभूतानि कांतामुखानि रति विग्रहकोपि

घ॰ख॰ टी॰ २ तानि रतेर्विग्रहस्तस्मिन्कोपितानि सुरतस्य संगः कोपितानीत्यर्थः उत्कंठयति उत्कंठयं तिके जलदा मेघाः कान् पथिकान् कथंभूते जलस्वनेनतः श्रूयमाणाः शोकः समुद्रहति प्रवहति कास्तत्हृदनितास्तु कथंभूतो शोकः अनंतः न विद्यते अंतो यस्य सअनंतः पतयिवज्ञवल्लभोनायातः ५ उद्यते कथ्यते किं तत्तु वक्ष्यमाणं कया प्रोषित प्रमदया गतभर्त्रका कया कुसातिभावने किरण समूहैः छादिते सति किं सदिनकरस्य नकेवलं भावने छादिते खाज्जलेपतति सति आकाशात्पानीये पतति सति कथंभूते

द्विड्विप्रसादयति संप्रति कोपितानि कांता मुखानि रतिविग्रहकोपितानि ।
उत्कंठयंति पथिकान् जलदाः स्वनंतः शोकः समुद्रहति तद्वनितास्वनंतः ॥
५ छादिते दिनकरस्य भावने खाज्जलेपतति शोकभावने मन्मथे च हृदि
हृत्तसुद्यते प्रोषितप्रमदयेद् उद्यते ६ सर्वकालमबलं ज्ञनोयदा आगता
स्यद्यपि तो गतोयदा निर्घृणेन परदेशवासेविना मारयिष्यथ इतेन माविना
७ ॥

पानीये शोकभावने शोकस्य भावनाय ज्ञतस्मिन् शोकोत्पादक इत्यर्थः नकेवलं पानीये पतति सति कामेपि हृदि हृत्तसुद्यते सति ६ अतो भो मेघाः सर्वकालम बलं ज्ञ बहुकालं प्रतीक्ष्य यस्मिन्काले दयितो वल्लभो गतस्तदा आगतास्थ यदा मा रयिष्यथ के यूयं कामां कथं विना केन वल्लभेन निर्घृणेन निर्गता त्तृणाद्यायस्मा सौनि॰ तेन पुनः कथंभूतेन परदेशवासेविता परदेशरतेनेत्यर्थः ७ भो मेघास्ते पथिकपांथलपथिकाद्यं मं वल्लभं प्रति यूयमेव ब्रूतः कथयत नयत कारणात् । राम २

यूयं शीघ्रलंघनाः शीघ्रेण लंघयतीति कामचारिणः इत्यर्थः क्व पथि मार्गे किंभूतं भोः प
थिकपांसुलमुच्यतां त्यज्यतां का अन्यदेशरतिः क्व सति अस्मिन् वर्षाकाले सति अ
थवेति पक्षान्तरे सा वधूः किमुच्यतामिति वल्लभं प्रति यूयमेव ब्रूतेत्यर्थः ८ भोः श्राव
ण एवं त्वं माधवे वैशाखे मासे निर्गतोसि प्रचलितोसि कथंभूते माधवे कोकिलास्व
नचकोरकूजिते कोकिलास्वनश्च चकोरकूजितं च ते विद्यते ऽस्मिन् माधवे मन्मथेन
कामेन सकलसमस्तजने लोके जिते सति हे श्राव हे मूढ एवं न उपयासि न आगच्छसि

भूतं तं पथिकपांसुलंघना यूयमेव पथि शीघ्रलंघनाः अन्यदेशरतिरद्य मुच्य
तां माधवात न वधूः किमुच्यतां ८ कोकिलास्वनचकोरकूजिते मन्मथेन सक
लेजनेजिते निर्गतोसि श्रावमासि माधवे नोपयासि शयनेपि माधवे ९ हंसप
ङ्क्तिरपि नाथ संप्रति प्रस्थिता वियति मानसं प्रति चातकोपि तृषितो ऽम्बु याचते दुः
खिता पथिक सा प्रिया च ते १० श्यामजालमतिभाति कोमलं वारि विन्दति च चा
तकोमलं अंबुदैः शिखिगणो विनाद्यते का रतिः प्रियमया विनाद्यते ११ ॥

क सति माधवे श्रीकृष्णे आयितेपि सति वर्षासमागतेपीत्यर्थः ९ भो नाथ भोः स्वामिन्
हंसपंक्तिः हंसावली संप्रति काले मानसं सरोवरं प्रति प्रस्थिता चलिता क्व वियति आ
काशे हे नाथ केवलं सा चलिता तृषितः पिपासितश्चातकोपि अंबुपानीयं याचते न
केवलं चातकोंबु याचते अपि तु हे पथिक सा प्रिया च दुःखिता स्थिता कस्य तेन वर्तति १०
भो पथिक अद्य अस्मिन् काले श्यामजालं वालतृणसमूहः अतिभाति अत्युत्कर्षेण शोभ
ते कथंभूतं श्यामजालं अतिकोमलं तथा निर्वारिणा नीयं विंदति लभंते च पुनः कोसौ

घ॰ख॰ चातकः कथंभूतं वारि अमलं निर्मलं केवलं चातकेन दुर्लभं ते अपि त्वद्विना घने स
टी॰ शब्दः कार्यते कः शिखिगणः मयूरसमूहः अंबुदैर्मेघैः तथा च सति हे प्रिय अस्य दे
३ शोकाग्निर्भवति कथं विना कया मया कस्य तेन वदति गमहृल्लभभूतेति पूर्णान्वयः ११
3 भो प्रिय वर्त्तते केकलापिनो मयूराः कथंभूताः मयूराः मेघशब्दमुदिता मेघध्वनिहर्
षिता इत्यर्थः पुनः कथंभूताः मे प्रोषिताहृदयशोककलापिनः विरहिन्याश्चित्तसंता
पोत्पादिन इत्यर्थः कुः अस्मिन्वर्षाकाले मा घनेऽलीयते का सा वल्लभा कस्य ते तवके
न मदेन कामेन कथंभूतेन दुर्द्धरेण दुःखेन म्रियत इति दुर्द्धरस्तेन कथंभूता मा तोय

मेघशब्दमुदितां कलापिनः प्रोषिताहृदयशोककलापिनः तोयदागमकृशाव
घ्राघ्यते दुर्द्धरेण मदनेन सा घने १२ किं कृपापि तव नास्ति कांतया पांडुगंडप
तितालकांतया शोकसागरजलेऽघपातितां त्वद्गुणस्मरणमेव पाति तां १३

दागमकृशा तोयं ददातीति तोयदा मेघास्तेषामागमनेन कृशा दुर्बला पुनः का सा व
शा मदवशा हृदये इत्यर्थः १२ भो गन नास्ति न भवति का कृपा दया कांतया वल्लभया
कथंभूतया पांडुगंडपतितालकांतया यौ डौ च तौ गंडौ चेति पांडुगंडौ तयोः पतिता अ
लकानामंता यस्यास्तया अत्र त्वं च पाति रक्षति किं त्वद्गुणस्मरणं कां तां प्रियां कथंभू राम
तां प्रियां पतितां कस्मिन् शोकसागरजले शोक एव सागरजलं तस्मिन् कुः अद्य अस्मि ३
न्काले भो घनाम हृल्लभ प्रतिभूत १३ भो प्रिय मां न समुपेक्षसे कथंभूतां मां दीनां दुः
खितां कदा कानने कुसुमितनकुटजेषु सत्सु कुसुमितानि कुटजानि येषु वनेषु

च पुनः प्रियरहितेषु प्रियेण रहितेषु पुनः कथंभूतेषु समुत्सुककाननेषु सम्यगुत्सुका
नि काननानि येषां तेषु अपरं कुसति वहति सति किं जलं पानीयं कथंभूतं जलं कलु
षं आविलं मिश्रितं कासां नदीनामित्यर्थः १४ हे सखि प्रियवियोगजशोककृदाहं दहसि क
स्मादिति ज्ञेयं प्रियस्य वियोगः तस्माज्जातः प्रियवियोगजः स चासौ शोकश्च तस्मा
द्दाहस्तं कथंभूतांहं गंभीरमेघरसितख्यापिता गंभीरेण मेघानां रसितेन शब्देन ख्यापि
ता पीडिता कदा मार्गेषु विनाशितेषु केन मेघसलिलेन स्पर्शाति कोसौ कामः किं

कुसुमितकुटजेषु काननेषु प्रियरहितेषु समुत्सुककाननेषु वहति च कलुषं जलं
नदीनां किमिति च मां समुपैत्सेनदीनां १४ मार्गेषु मेघसलिलेन विनाशितेषु
कामो धनुः स्पृशति तेन विनाशितेषु गंभीरमेघरसितख्यापिताकदाहं जहासि स
खि प्रियवियोगजशोकदाहं १५ नववारिकणैर्विराजितानां स्वनदंभोधरवात
वीजितानां मदनस्य कृते निकेतनानां प्रतिभात्यघ वनानि केतकीनां १६ ॥ ॥

धनुः कथं विना केन वल्लभेन कथंभूतं धनुः शितेषु शितानि इषवो बाणा यस्य तत् १५
हे सखि अस्मिन्काले केतकानां वनानि प्रतिभाति प्रतिशोभन्ते पुनः कथंभूतानां स्वन
दंभोधरवातवीजितानां स्वनंतश्च ते अंभोधराश्चेति तेषां वातेन वीजितास्तेषां पुनः क
थंभूतानां निकेतनानां गृहाणां कस्य कृते मदनस्य कामस्य निमित्ते कृतानां एतदपि
वल्लभगतभर्तृकया उच्यते १६ हे सखे कौतूहलत्वयत्वा प्रजापतिर्ब्रह्मा ससर्ज तत्त्वा
तरां साधु भवं कथंभूतस्त्वं कामनिवासः कंदर्पस्य स्थानभूतस्तत्संबोधने का
मनिवासः पुनः कथंभूतस्त्वं नेत्रोत्सवं नेत्राणामुत्साहकारकः केषां सयौवनानां

घ॰ख॰ टी॰ ४

तरुणानां पुनः कथंभूतस्त्वं प्रवरः श्रेष्ठः केषां मध्ये पुनः कथंभूतस्त्वं युक्तः काममञ्जरी
भिः एतेनैतदुक्तं भवति विरहानलेन पीड्यमानापि पुष्पितसज्जमद्दीकरेणाक्रमेणाधि
कपीडिता १७ हे नवकदंबतरो ते नवशिरो अवरतास्मि शिरसा अवनतास्मि शिरो अवन
ता तेतव कुसुममस्मिस्तिंई पछ्हासितं तस्मिन्मदनः कन्दर्पो वसति अपरं च भो कुटज किं अ
वस्यते कैः कुसुमैः तेतव प्रणयितामि नमस्कारोमि कथंभूतस्य ते दुःप्रसहस्य दुःखे
न प्रसह्यते दुःप्रसहस्य १८ हे तरुवर मह्हीस्तु मोजनमते तवपदे विनतास्मि प्रणतास्मि

नत्साद्भुधन्योस्तनतां समसज्ज्ञप्रजापतिः कामनिवाससज्ञे त्वं मञ्जरीभिः प्रवरोव
नानानेत्रोत्सवश्वासिस्मयोवनानां १७ नवकदंबशिरोवनतास्मि ते वसति तो
मदनः कुसुमस्मिते कुटज किं कुसुमैरवहस्यते प्रणयितामि च दुःप्रसहस्य
ते १८ तरुवर विनतास्मि ते सदाहं हृदयं मे प्रकरोषि किं सदाहं तव पुष्पनिरी
क्षितापदेहं विसृजेयं सहसैवनीपदेहं १९ कुसुमैः कपशोभितां सितैर्घनमुक्ता
कुलवप्रकाशितैः अधुना समवेक्ष्य कालतां भ्रमरं भ्रवति यूथिकालतां २०

मे मम हृदयं किं सदाहं करोषि दाहेन सह वर्तते सदाहं सं भो नीप सहसा तत्क्षणादेव
देहं शरीरं विसृजेयं त्यजामि कथंभूताहं तव पुष्पनिरीक्षितात तव पुष्पे निरीक्षितं यस्याः
सा तथेति कोपेन पीडित याविरहिन्या कदंबवृत्तं प्रति इदमुच्यते १९ हे सखि अस्मिन् राम ४
काले कालतां कालस्वभावं समवेक्ष्य ज्ञात्वा भ्रमरोपि यूथिकालतां भवति कथंभूतां
यूथिकालतां कुसुमैः कलशोभितां कथंभूतैः कुसुमैः सितैः पुनः कथंभूतैः घनमु
क्तो कुलप्रकाशितैः घनैः मुक्ताः अकुलवास्तैः प्रकाशितैः एतेनयुक्तं भवति अज्ञा

घ॰ख॰ टी॰ ५ नोपिभ्रमरोपिसमयंजानातिसवल्लभोनजानातीत्यर्थः २० हेसखिएषावर्षाऋतुः
तासांयोषितांफलः याएषुदिनेषुवर्षावासरेषुरत्नुस्तवंप्रियतमैःसहनानयंति क
थंभूतेषुदिनेषुमेघाद्युधांबुधरगर्जितदुर्दिनेषुतेषांपुरुषाणामयमृतुःसफलया।
प्रियसखीसमानयंति २१ अहंशायेयंशपथंकरोमि कैःभवानुरक्तवनितासुरते

5

मासामृतुःसफलएवहियादिनेषुमेघाद्युधांबुधरगर्जितदुर्दिनेषु रत्नु
स्तवंप्रियतमैःसहमानयंतिमेघागमेप्रियसखीअसमानयंति २१ भ
वानुरक्तवनितासुरतैःशपेयमालभ्यचांबुतृषितःकरकोशपेयं जीये
ययेनकविनायमकैःपरेणतस्मैवहेयमुदकंघटखर्परेण २२ ॥

भावानुरक्तवनितामपिनव्रजामितृषितोपिसन्करकोशपेयमंबुचालभ्यशपेयंता राम
वत्तपिचमियावत्तस्मैकवयेघटखर्परेणसलिलंनोद्वहेयम् तस्मैकस्मैकविना ५
अहंमनयमकैःजीयेय २२ इतिश्रीटीकायांघटखर्परार्थदीपिकायांसंगोपांगास
माप्ता ॥ शुभमस्तु ॥